**दिनाङ्क : 05.01.2025** **प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रधानमन्त्री-दिल्ली परियोजना:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दिल्ल्यां द्विशतोत्तर-द्वादशसहस्र कोटिरूप्यकाणां अनेकविकासात्मकपरियोजनानां उद्धाटनं आधारशिलां च स्थापयिष्यति। प्रधानमंत्री साहिबाबाद-न्यूअशोकनगरयोः मध्ये दिल्ली-गाजियाबाद-मेरठ-क्षेत्राणां त्रयोदश-किलोमीटर्-परिमितस्य भागस्य नमोभारत- विथ्याः उद्धाटनम् करिष्यति। यस्य निर्माणं प्रायः सार्द्धचतुश्शतं कोटिरूप्यकाणां व्ययेन अभवत् । साहिबाबाद-आरआरटीएस-स्थात्रात न्यूअशोकनगर आरआरटीएस-स्थात्रम् यावत् नमोभारतरेलयाने यात्रां अपि करिष्यति।

**भारत-अमेरिका एनएसए बैठक**

अमेरिकादेशस्य राष्ट्रियसुरक्षापरामर्शदः जेकसुलिवन् अद्यारभ्य भारतस्य द्विदिवसीय-यात्रायां भविष्यति। सः राष्ट्रियसुरक्षापरामर्शदेन अजीतदोवालेन, विदेशमन्त्रिणा एस जयशंकरेन च सह कतिपयैः प्रमुखैः भारतीयगणमान्यजनैः सहापि उपवेशनं करिष्यति।

**शीत-उत्तरभारत**

उत्तरभारतस्य विभिन्नेषु भागेषु तीव्रशीतलहरी-कारणेन कुज्झटिकायाः कारणेन च सामान्यजीवनं बाधितम्। सघन-कुज्झटिकायाः कारणेन अनेकक्षेत्रेषु दृश्यता शून्यं यावत् आसीत्, अस्मात् कारणात् विमान-रेलयानयोः सेवाः बाधिता:। ऋतुविभागेन पूर्वोत्तरप्रदेशस्य विभिन्नक्षेत्रेषु शीतदिवसस्य स्थितिः अनुमानितम्। पञ्जाबे, हरियाणाराज्ये, चण्डीगढक्षेत्रे, दिल्ल्यां, उत्तरप्रदेशे, बिहारराज्ये, उत्तरराजस्थाने, उत्तरमध्यप्रदेशे, उपहिमालयीय-पश्चिमबङ्गे सिक्किमे च रात्रौ सघनकुज्झटिकायाः पूर्वानुमानं कृतम्। ऋतुविभागेन उक्तं यत्, आगामिषु चतुर्षु दिवसेषु पूर्वपश्चिमभारतेषु न्यूनतम-तापमाने परिवर्तनं न भविष्यति।

**जितेन्द्र: - स्थापनादिवस:**

केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्र सिंह: ह्य: नवदिल्ल्यां वैज्ञानिक-औद्योगिकानुसन्धान-विभागस्य चत्वारिंशत्तमे स्थापनदिवससमारोहे भागं भजितवान्। एतस्मिन् कार्यक्रमे भारतप्रशासनस्य प्रधान-वैज्ञानिक-परामर्शद: प्रो.

अजयकुमारसूद: औद्योगिकानुसन्धानपरिषद: च महानिदेशक: अपि उपस्थितौ आस्ताम्। अस्य समारोहस्य उद्देश्यं विभिन्नानां कार्यक्रमाणां माध्यमेन औद्योगिकानुसन्धानं नवाचारं च अग्रे समेधितुं विभागस्यास्य भूमिकासम्मानं वर्तते।

**बीजेपी - प्रत्याशिनां सूचिः**

भाजपेति दलेन नवदिल्ली-विधानसभासनात् 'आप' इति दलस्य संयोजकस्य अरविन्द-केजरीवालस्य विरुद्धं दलस्य पूर्वसांसदः परवेश-वर्मा इत्यस्य नामाङ्कितः, तत्रैव दलस्य नेता रमेशः बिधुरी कालकाजी-विधानसभासनात् दिल्ल्याः मुख्यमन्त्रिणः अतिशी इत्यस्याः विरुद्धं नैर्वाचनिक-समराङ्गणे भविष्यति। भाजपेति दलेन ह्य: दिल्ली-विधानसभा-निर्वाचनाय नवविंशति-अभ्यर्थिनां प्रथमसूचिः प्रख्यापिता। दिल्ली-भाजपा-दलस्य पूर्वप्रमुखः सतीश-उपाध्यायः मालवीयनगर-विधानसभासनात्, तथा च आप-दलस्य पूर्वनेता कैलास-गहलोतः, यः सद्यः एव भाजपा-दले सम्मिलितः अस्ति, सः बिजवासन-विधानसभासनात् स्पर्धिष्यतः। गान्धी-नगर-क्षेत्रात् अरविन्दर-सिङ्घ-लवली सहैव राजौरी-गार्डन्-विधानसभासनात् भाजपा-नेता मञ्जिन्दर-सिङ्घसिरसा स्पर्धिष्यतः। विजेन्द्रगुप्ता रोहिणी-विधानसभासनात् नैर्वाचनिक-समराङ्गणे भविष्यति।

**फुटबॉल-भारतीय सुपर लीग**

भारतीयसुपरलीगफुटबॉलक्रीडायां जमशेदपुर-एफसी-इत्यनेन दलेन गतरात्रौ जेआरडी टाटास्पोर्ट्स् परिसरे बेङ्गलूरु-एफसी-इत्येतं दलं द्वि एकं इत्यङ्कान्तरालेन पराजितम्।

**।। इति वार्ता:।।**